किन्तु कर्कि नियुतौ सदोदितौ" इति भास्कराचार्योक्तं नङ्गच्छते" रङ्गनाथः ।

**क्रान्तिक्षेत्र** न० क्रान्तिज्ञानार्थं क्षेत्रम् । सि० शि० उक्ते अपमक्षेत्राकारे पदार्थे यथा

"क्षेत्राणि वक्ष्येऽपमसंभवानि संक्षेपतोऽक्षप्रभवाणि चातः। भुजोऽपमः कोटिगुणो द्युजीवा कर्णस्त्रिभज्या त्रिभुजेऽपमोत्थे । मेषादिजीवाः श्रुतितोऽपवृत्ते तद्भूमिजे क्रान्तिगुणा भुजाः स्युः । तत्कोटयः स्वद्युनिशाख्यवृत्ते व्यासार्द्धवृत्ते परिणामितानाम् । चापेषु तासामवशेषतो ये तेऽथो विशुद्धा उदया निरक्षे" सि० शि०

**क्रान्तिज्या** स्त्री क्रान्तिवृत्तक्षेत्रस्य सि० शि० उक्ते अक्षक्षेत्रावयवभेदे । अक्षक्षेत्रशब्दे ४२पृ० अक्षक्षेत्राणि उक्तानि । तन्मानानयनम् ।

"युक्तायनांशादपमः प्रसाध्यः कालौ च खेटात् खलु भुक्तभोग्यौ । जिनांशमौर्व्या १३९७ गुणितार्कदोर्ज्या त्रिज्यो ३४३८ द्धृता क्रान्तिगुणोऽस्य वर्गम् । त्रिज्या कृतेः ११८१९८४४ प्रोज्झ्य पदं द्युजीवा क्रान्तिर्भवेत् क्रान्तिगुणस्य चापम् । अक्षप्रभासंगुणितापमज्या तद्द्वादशांशो भवति क्षितिज्या सि० शि० ।

"अत्र खेटादित्युपलक्षणम् । यस्मात् खेटाल्लग्नाद्वाऽपमः साध्यस्तस्मात् सायनांशादेव । तथा यस्मादुदयसम्बन्धिनौ भुक्तभोग्यकालौ साध्यौ तस्मादपि सायनांशादेव । सायनार्कस्य दोर्ज्या जिनभागज्यया गुणिता त्रिजयया भक्ता क्रान्तिजया स्यादित्यादि स्पष्टार्थम् ।

अस्योपपत्तिः । विषुवत्क्रान्तिवृत्तयोर्यान्योत्तरमन्तरं क्रान्तिः । तयोः संपाते क्रान्त्यभावः । ततस्त्रिभेऽन्तरे परमा जिन २४तुल्यभागाः । अतस्तत्संपाताद्दारभ्य क्रान्तिः साध्या । उदयाश्च तत एव । स तु संपातो मेषादेः प्रागयनांशतुल्येऽन्तरे । अतः सायनांशात् खेटात् क्रान्तिर्भुक्तभोग्यकालौ चेयुक्तम् । यदि त्रिज्यातुल्यया भुजजयया जिनांशज्यातुल्या क्रान्तिजया लभ्यते तदेष्टजयया किमिति । फलं क्रान्तिजया विषुवद्वृत्तात् तिर्यग्रूपा भवति । क्रान्तिजया भुजस्त्रिजया कर्णस्तद्वर्गान्तरपदमहोरात्रवृत्तव्यासार्धम् । सैव द्युजया" प्रमि० ।

देशभेदे कालभेदेन रवेः क्रान्तिज्याज्ञानार्थं प्रश्नपूर्वकं सि० शि० निर्णीतं यथा

"मार्तण्डः सममण्डलं किल यदा दृष्टः प्रविष्टः सखे ! काले पञ्चघटीमिते दिनगते यद्वा नते तावति । केनाप्युज्जयिनीगतेन तरणेः क्रान्तिं तदा वेत्सि चेन्मन्ये त्वां निशितं समग्रगणकोन्मत्तेभकुम्भाङ्कुशम्" ।

"हे गणक ! केनचित् किलोज्जयिनीगतेन यदा दिनगते पञ्चघटीमिते काले मार्तण्डः सममण्डलं प्रविष्टो दृष्टस्तदा कियती क्रान्तिजयेत्येकः प्रश्नः । अथान्यः तावति पञ्चघटीमिते नते वा काले समण्डलं प्रविष्टो दृष्टस्तदा च या क्रान्तिजया तां त्वं चेद्वेत्सि तदा समग्रगणकोन्मत्तेभकुम्भाङ्कुशं निशाणोद्धृतं त्वामहं मन्ये" प्रमि०

"या स्याद्वेरुन्नतकालजीवाभीष्टा हृतिः सा प्रथमं प्रकल्प्या । अर्का१२ क्षभाघातहृताक्षकर्णकृत्योद्धृता स्यादपमजयकाऽस्याः । चरादिकेनेष्टहृतिः प्रसाध्या ज्ञुण्णस्तया क्रान्तिगुणोऽसकृच्च । तदाद्यहृत्या विहृतः स्फुटः स्यात् सहस्ररश्मौ सममण्डलस्थे" सि०शि० ।

"रवेः समण्डलप्रवेशे य उन्नतकाल उद्दिष्टस्तस्य जीवा सा तावत् प्रथममिष्टहृतिः कल्प्या । ततो द्वादशगुणयाक्षया गुणया पलकर्णवर्गेण भाज्या । सा किल स्थूला क्रान्तिजया भवति । तस्याः क्रान्तिजयाया द्युजयां कुज्यां चरज्यां चरं च कृत्वा"अथोन्नताद्दूनयुताच्चरेण"इत्यादिनेष्टहृतिः साध्या । तया पूर्वमागता क्रान्तिज्या गुणया । आद्यहृत्या कल्पितया भाज्या । फलं स्फुटासन्ना क्रान्तिज्या भवति । अत्रोपपत्तिः । अत्रोन्नतकालजीवातुल्या प्रथमं तद्धृतिः कल्पिता। तस्या अनुपातेन शङ्कुः । यदि पलकर्णेन द्वादशकोटिस्तदा तद्धृतिकर्णेन किमिति। अत्र तद्धृतेर्द्वादशगुणः पलकर्णो हरः । फलं सममण्डलशङ्कुः । पुनरन्योऽनुपातः । यदि पलकर्णेनाक्षभा भुजो लभ्यते तदा सममण्डलशङ्कुतुल्येन कर्णेन किमिति । फलं क्रान्तिज्या स्थूला । अस्याः क्रान्तिज्यायाश्चरादिकेन "अथोन्नताद्दूनयुताच्चरेण" इत्यादिनेष्टहृतिः साध्या । तां तद्धृतिं प्रकल्प्य पुनः क्रान्तिज्या साध्या । एवमसकृद्यावदविशेषः । तत्रासकृत्कर्मणि त्रैराशिकेन क्रियोपसंहारः कृतः । यदि कल्पितया हृत्येयं क्रान्तिजया लभ्यते तदेदानीमानीतया किमिति । एवं क्रान्तिजया स्फुटा स्यादित्युपपन्नम् । इदानीं द्वितीयप्रश्नस्योत्तरमाह" प्रमि०

"तदा नतजयात्रिभजीवयोर्यद्वर्गान्तरं तत् पलभाकृतिघ्नम् । तेनोद्धृतो व्यासदलस्य वर्गो वेदेन्द्र १४४निघ्नोऽथ सहृपलब्ध्या । व्यासार्धवर्गाद्विहृतात् पदं स्यात् क्रान्तिजयका सा त्रिभशिञ्जिनीघ्नी । जिनांशमौर्व्या विहृताऽथचापाद्ये प्रवक्ष्ये च यथा रविः स्यात्"सि०शि० ।